स्यादस्तीति वाक्ये स्यात्पदमनर्थकं स्यात् अनेकान्तद्योतकत्वे तु स्यादस्ति कथञ्चिदस्तीति स्यात्पदात् कथञ्चिदिति अयमर्थो लभ्यत इति नानर्थकम्। तदाह।

स्याद्वादः सर्व्वथैकान्तत्यागात् किं वृत्तचिद्विधेः।
सप्तभङ्गिनयापेक्षो हेयादेयविशेषकृदिति॥

यदि वस्त्वस्त्येकान्ततः सर्व्वथा सर्व्वदा सर्व्वत्र सर्व्वात्मनास्तीति न उपादित्साजिहासाभ्यां क्वचित् कदा केनचित् प्रवर्त्तेत निवर्त्तेत वा प्राप्तप्रापणीयत्वहेयहानानुपपत्तेश्च। अनेकान्तपक्षे तु कथञ्चित् क्वचित् केनचित् सत्त्वेन हानोपादाने प्रेक्षावतामुपपद्येते। किञ्च वस्तुनः सत्त्वं स्वभावः असत्त्वं वेत्यादि प्रष्टव्यं न तावदस्तित्वं वस्तुनः स्वभाव इति समस्ति घटोऽस्तीत्यनयोः पर्य्यायतया युगपत्प्रयोगायोगात् नास्तीति प्रयोगविरोधाच्च एवमन्यत्रापि योज्यम्। यथोक्तम्।

घटोऽस्तीति न वक्तव्यं सन्नेव हि यतो घटः।
नास्तीत्यपि न वक्तव्यं विरोधात् सदसत्त्वयोः॥
इत्यादि॥

तस्मादित्थं वक्तव्यं सदसत्सदसदनिर्व्वचनीयवादभेदेन प्रतिवादिनश्चतुर्व्विधाः पुनरप्यनिर्व्वचनीयमतेनामिश्रितानि सदसदःदिमतानीति त्रिविधाः तान् प्रति किं वस्त्वस्तीत्यादिपर्य्यनुयोगे कथञ्चिदस्तीत्यादिप्रतिवचनसम्भवेन ते वादिनः सर्व्वे निर्व्विण्णाः सन्तः तूष्णीमासत इति सम्पूर्णार्थविनिश्चायिनः स्याद्वादमङ्गीकुर्व्वतस्तत्र तत्र विजय इति सर्व्वमुपपन्नम्। यदवोचदाचार्य्यः स्याद्वादमञ्जर्य्याम्।

अनेकान्तात्मकं वस्तु गोचरः सर्व्वसंविदाम्।
एकदेशविशिष्टोऽर्थो न यस्य विषयो मतः॥
न्यायानामेकनिष्ठानां प्रवृत्तौ श्रुतवर्त्मनि।
सम्पूर्णार्थविनिश्चायि स्याद्वस्तु श्रुतमुच्यत इति॥

अन्योन्यपक्षप्रतिपक्षभावाद्-
यथापरे मत्सरिणः प्रवादाः।
नयानशेषानविशेषमिच्छ-
न्नपक्षपाती समयस्तथार्हत इति॥

जिनदत्तसूरिणा जैनं मतमित्थमुक्तम्।
बलभोगोपभोगानामुभयोर्द्दानलाभयोः।
अन्तरायस्तथा निद्रा भीरज्ञानं जुगुप्सितम्॥
हिंसा रत्यरती रागद्वेषौ रतिरतिस्मरः।
शोको मिथ्यात्वमेतेऽष्टादश दोषा नयस्य सः॥
जिनो देवो गुरुः सम्यक् तत्त्वज्ञानोपदेशकः।
ज्ञानदर्शनचारित्राण्यपवर्गस्य वर्त्तिनि॥
स्याद्वादस्य प्रमाणे द्वे प्रत्यक्षमनुमापि च।
नित्यानित्यात्मकं सर्व्वं नव तत्त्वानि सप्त वा॥
जीवाजीवौ पुण्यपापे चास्रवः संवरोऽपि च।
बन्धो निर्ज्जरणं मुक्तिरेषां व्याख्याधुनोच्यते॥
चेतनालक्षणो जीवः स्यादजीवस्तदन्यकः।
सत्कर्म्मपुद्गलाः पुण्यं पापं तस्य विपर्य्ययः॥
आस्रवः कर्म्मणां बन्धो निर्ज्जरस्तद्वियोजनम्।
अष्टकर्म्मक्षयान्मोक्षोऽथान्तर्भावश्च कैश्चन॥
पुण्यस्य संस्रवे पापस्यास्रवे क्रियते पुनः।
लब्धानन्तचतुष्कस्य लोकागूढ़स्य चात्मनः।
क्षीणाष्टकर्म्मणो मुक्तिर्निर्व्यावृत्तिर्ज्जिनोदिता॥
सरजोहरणा भैक्षभुजो लुञ्चितमूर्द्धजाः।
श्वेताम्बराः क्षमाशीलाः निःसङ्गा जैनसाधवः॥
लुञ्चिताः पिच्छिकाहस्ताः पाणिपात्रा दिगम्बराः।
ऊर्द्धाशिनो गृहे दातुर्द्वितीयाः स्युर्जिनर्षयः॥
भुङ्क्ते न केवलं न स्त्री मोक्षमेति दिगम्बरः।
प्राहुरेषामयं भेदो महान् श्वेताम्बरैः सहेति॥”
इति सर्व्वदर्शनसंग्रहे आर्हतदर्शनम्॥)

जैपालः, पुं, (जयपालः पृषोदरादित्वात् साधुः।) जयपालवृक्षः। इति द्विरूपकोषः॥

जैमिनिः, पुं, मुनिविशेषः। स वेदव्यासशिष्यः उत्तरमीमांसाकर्त्ता भारतकृत् वज्रवारकश्च। यथा, पुराणवचनम्।
“जैमिनिश्च सुमन्तुश्च वैशम्पायन एव च।
पुलस्त्यः पुलहश्चैव पञ्चैते वज्रवारकाः॥”

जैवातृकः, पुं, (जीवयति ओषधिप्रभृतीनीति। जीव+णिच्+“आतृकन् वृद्धिश्च।” उणां। १। ८१। इति आतृकन् ईकारस्य वृद्धिश्च।) चन्द्रः। कर्पूरः। इत्यमरः। १। ३। १४. २। ६। १३०॥ पुत्त्रः। इति संक्षिप्तसारे उणादिवृत्तिः॥ भेषजम्। इति हेमचन्द्रः॥

जैवातृकः, त्रि, (जीवतीति। जीव+आतृकन् वृद्धिश्च।) दीर्घायुः। (यथा, दशकुमारचरिते। “जैवातृक! ननु श्रूयते पतिरस्याः मिथिलायां प्रहारवर्म्मासीत्॥”) कृशः। इति मेदिनी। के, १६०॥

जैह्म्यं, क्ली, (जिह्मस्य कुटिलस्य भावः। जिह्म+भावे ष्यञ्।) जिह्मता। कुटिलता। यथा, मनुः। ११। ६७।
“जैह्म्यं पुंसि च मैथुन्यं जातिभ्रंशकरं स्मृतम्॥”

जोङ्गकं, क्ली, (जुङ्गति त्यजति सद्गन्धमिति। जुगि त्यागे+ण्वुल्। निपातनात् गुणः।) अगुरु। इत्यमरः। २। ६। १२६॥

जोङ्गटः, पुं, (जुङ्गति अरोचकत्वं परित्यजत्यनेनेति। जुङ्ग+बाहुलकात् अटन् गुणश्च।) गर्भिण्यभिलाषः। इति हारावली। २१६॥ साध् इति भाषा॥

जोटिङ्गः, पुं, (जूटेन इङ्गति प्रकाशते इति। अच्। पृषोदरादित्वात् साधुः।) महादेवः। महाव्रती। इति त्रिकाण्डशेषः॥

जोन्नाला, स्त्री, देवधान्यम्। इति हेमचन्द्रः। ४। २४४॥ (जोमाला इति क्वचित् पाठः॥)

जोषं, क्ली, (जुष हर्षे+भावे घञ्।) सुखम्। इति शब्दरत्नावली॥ (यथा, ऋग्वेदे।१।१२०।१।
“का राधद्धोत्राश्विना वां को वां जोष उभयोः॥”
“जोषे प्रीतिजनके व्यवहारे।” इति दयानन्दभाष्यम्॥)

जोषम्, व्य, (जुष्+बाहुलकात् अम।) तूष्णीम्। (यथा, महाभारते। २। ६८। १६।
“नैवमित्यब्रवीच्चैनं जोषमास्स्वेति भारत!॥”) सुखम्। इत्यमरः। ३। ३। २५०॥

जोषा, स्त्री, (जुष्यते सेव्यते उपभुज्यते इति। जुष्+घञ्। स्त्रियां टाप्।) योषा। इति शब्दरत्नावली॥

जोषिका, स्त्री, (जुषते सेवते इति। जुष+ण्वुल्। टापि अत इत्वम्।) जालिका। इति शब्दरत्नावली॥

जोषित्, स्त्री, (जुष्यते उपभुज्यते। जुष्+“हृसृरुहियुषिभ्य इतिः।” उणां। १। ९९। इतिप्रत्ययः। पृषोदरादित्वात् यस्य जः।) योषित्। इति शब्दरत्नावली॥

जोषिता, स्त्री, (जोषित्+हलन्तत्वाद्वा टाप्।) योषित्। इति शब्दरत्नावली॥

ज्ञः, पुं, (जानातीति। ज्ञा+“इगुपधज्ञाप्रीकिरः कः।” ३। १। १३५। इति कः।) ब्रह्मा। बुधः। पण्डितः। (यथा, चरके सूत्रस्थाने ३० अध्याये।
“पशुः पशूनां दौर्ब्बल्यात् कश्चित् मध्ये वृकायते।
ससत्वं वृकमासाद्य प्रकृतिं भजते पशुः॥
तद्वदज्ञो ज्ञमध्यस्थः कश्चित् मौखर्य्यसाधनः।
स्थापयत्याप्तमात्मानमाप्तं त्वासाद्य भिद्यते॥”) मङ्गलग्रहः। इति धरणी॥

ज्ञप, क म ज्ञप्तौ। इति कविकल्पद्रुमः। (चुरां-परं-सकं-सेट्।) क म, ज्ञपयति। ज्ञप्तिर्मारणालोकनिशाणतोषणस्तुतयः। ज्ञाकम इत्यनेनैवेष्टसिद्धौ ज्ञपपाठश्चुरादिरुभयपदीतिमते फलवत्कर्त्तरि परस्मैपदार्थः। इति धातुप्रदीपः। वस्तुतस्तु ज्ञप्तिपदमस्मादेव निष्पादितम्। तेन अनिर्द्दिष्टार्थतया ज्ञप्तिरिह ज्ञानम्। अत एव प्रज्ञो श क्षीषे इत्यत्र अस्यैव सनन्तस्य निष्पादितेन ज्ञीप्सशब्देन ज्ञातुमिच्छा प्रतिपाद्यते। एवं ज्ञानपर्य्याये प्रतिपन्नज्ञप्तिचेतनेत्यमरः। इति दुर्गादासः॥

ज्ञपितः, त्रि, (ज्ञप्यते स्मेति। ज्ञप+णिच्+क्तः।) ज्ञापितः। इत्यमरः। ३। १। ९८॥

ज्ञप्तः, त्रि, (ज्ञप्यते स्मेति। ज्ञप+णिच्+क्तः। “वा दान्तशान्तेति।” ७। २। २७। इति साधुः।) ज्ञापितः। इत्यमरः। ३। १। ९८॥

ज्ञप्तिः, स्त्री, (ज्ञप्यते ज्ञायते ऽनयेति। ज्ञप+भावे क्तिन्। इडभावः।) बुद्धिः। इत्यमरः। १। ५। १॥ (यथा, कथासरित्सागरे। २५। ५७।
“ततो दीर्घतपोवाक्यात् सम्भाव्य द्वीपगाश्च ताम्।
तज्ज्ञप्तये दाशपतेरुत्स्थलद्वीपवासिनः॥”)

ज्ञा, क प्रेरणे। इति कविकल्पद्रुमः॥ (चुरां-परं-सकं-सेट्।) प्रेरणमिह नियोजनम्। क, ज्ञापयति भृत्यं स्वामी नियुक्तं करोतीत्यर्थः। इति दुर्गादासः॥

ज्ञा, क म मारणे। आलोके। निशाणे। तोषणे। स्तुतौ। इति कविकल्पद्रुमः॥ (चुरां परं-सकं-सेट्।) क म, ज्ञपयति अज्ञपि अज्ञापि ज्ञपं ज्ञप